धिष्यति॥ कृष्णाजिनमादत्ते पूर्ववत्स्तृणाति कृष्णाजिने॥ ॐ शर्मासि।
व अवधूयेति। ॐ अवधूतꣳ रक्षोऽवधूता अरातयः॥ उद॰प्रस॰गिति॥ ॐ अदित्यास्त्वग
सि प्रति त्वादितिर्वेत्तु॥ सव्यास्तृत्य॰ तस्मिन्दृषदं धिषणासीति॥ ॐ धि प॰
षणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु॥ पश्चाच्छम्यामुपोहत्युदीचीं।
दिव इति॥ ॐ दिवस्कंभनीरसि॥ दृषदुपलां धिषणासीति॥ ॐ धि
षणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु॥ धान्यमसीति तंडुलानो ८
प्य॥ ॐ धान्यमसि धिनुहि देवान्॥ पिनष्टि प्राणाय त्वेति प्रतिमंत्रं॥
ॐ प्राणाय त्वा पिनष्मि॥ ॐ अपानाय त्वा पिनष्मि॥ पिष्यमाणे पुनि
र्वपत्यसन्नो महीनामसीत्याज्यं॥ ॐ महीनां पयोसि निरूप्याज्यं वेदे

मीति यजमानो वेदं करोति॥ ॐ वेदोसि येन त्वं देव वेद देवेभ्यो वेदो
भवस्तेन मह्यं वेदो भूयाः॥ ॐ व्यानाय त्वा पिनष्मि॥ दीर्घामितिकृ
ष्णाजिने प्रोहति॥ ॐ दीर्घामनु प्रसितिमायुषे धां देवो वः सविता
हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वे॰तीक्षते
॥ ॐ चक्षुषे त्वाइक्षते॥ पात्र्याꣳ सपवित्रायां पिष्टान्यावपति देवस्य
त्वेति॥ ॐ देवस्य॰ साम्। संवपामि। अप एनस्य पश्चाद्दुपवित्रास्यं तवेदि
का। उपसर्जनीरानयत्यन्यः पवित्रास्यां प्रतिगृह्णाति समाप इति
॥ ॐ समापः ओषधीभिः समोषधयो रसेन॥ संꣳ रेवतीर्जगतीभिः
पृच्यंताꣳ सम्मधुमतीर्मधुमतीभिः पृच्यंताम्॥ संयो जनयत्यै त्वे

Takshashila Project

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

ति॥ ॐ जनयत्यै त्वा संयौमि॥ समं विकृत्य पात्र्यां हविः पिण्डानालभ्य इद
मग्नेरिदमग्नीषोमयोरिति पुरोडाशाकारं वर्तयित्वा मध्ये पृथ्वौ ॐ
अरोर्धचावदानं कपित्वा॥ ॐ इदमग्नेः॥ आलते॥ ॐ इदमग्नीषोम
योः॥ आलते॥ यथादेवतमन्यत्॥ अस्थाप्ये त्वा आज्यमधिश्रय
ति॥ आज्यपुरोडाशानां युगपदधिश्रयणम्॥ ॐ इषे त्वा अधिश्र
यामि॥ घर्मोसीति पुरोडाशं युगपत्॥ ॐ घर्मोसि विश्वायुः॥ ॐ घ
र्मो०॥ युः॥ उरु प्रथा इति प्रथयति यावत्कपालमनति पृथुम्॥ ॐ उ ५
रु प्रथस्वोरु ते यज्ञपतिः प्रथताम्॥२॥ अग्निष्टदस्य द्भिरभिमृशति स
कृत्रिर्वा॥ ॐ अग्निष्टे त्वचं मा हिंसीत्॥२॥ पिष्टलेपापनयनं॥ पात्रं

गुलिप्रक्षालनं॥ पर्यग्निकरोत्यंतरितं रक्षोंतरिता अरातय इति
सहाज्यं॥ ॐ अंतरितं रक्षोंतरिता अरातयः॥ अ०दं० देवस्त्वेति श्रपणं
ॐ देवस्त्वा सविता श्रपयतु वर्षिष्ठेधिनाके॥२॥ माजेरित्यालभते॥ ॐ मा
मेर्मा संविक्थाः॥२॥ अतमेरुरिति स्मृता वसि वासयति भस्मना वेदेनोप
वेषेण वा॥ ॐ अतमेरुर्यज्ञोतमेरुर्यजमानस्य प्रजा भूयात्॥२॥ पा
त्रं गुलिप्रक्षालनं प्राग्ने सोनिनयत्यसजित प्पश्वस्य गस्र्ं स्यंदमानं
त्रिताय त्वेति प्रतिमंत्रं॥ प्रांचं रवनति प्रसंचं निनयति॥ ॐ त्रिताय त्वा
निनयामि द्वितं त्रि॥ तयाप्यायनं मम॥ द्विताय त्वा निनयामि॥ इदं द्विता
याप्यायनं मम॥ ॐ एकताय त्वा निनयामि॥ इदमेकतायाप्यायनं

मम ॥ अन्वाहार्यं दक्षिणा आवधिष्यति ॥ अन्तर्वाग्रतोपायनं ॥ अप
रेणाहवनीयं वेदिं खनति ॥ वेदिमानं ॥ याममात्री पश्चात् प्रथमः
। द्वितीयः । तृतीयः । चतुर्थः । अर । त्रिं प्राची । प्र० द्वि० रत्नी० । पुरस्ताच्च प्र०
द्वि० र० । अंगुलखातां ॥ अपरिमितां वा प्राक्प्रवणामुदक्प्रवणां मध्यसंगृ
हीतां ॥ अग्निमग्निनोद्धृत्य ॥ वेदिं परिगृह्य वितृतीये ग्नीदुत्तरत उत्करं
करोति देवस्य त्वेति स्फ्यमादाय सव्यं ॥ ॐ देवस्य० माददे ॥ आददे
ध्वरकृतं देवेभ्यः ॥ सव्ये कृत्वा दक्षिणेनालभ्य जपतीन्द्रस्य बाहुरिति ॥ १०
ॐ इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मते
जा द्विषतो वधः ॥ नोपस्पृशेत्पृथिव्या मा नीतेन स्तंबयजुर्हरिष्यन् ॥

वेद्यां तृणं निदधाति पृथिव्यै वर्मासीति ॥ ॐ पृथिव्यै वर्मासि ॥ पृ
थिवि देवयजनीति तृणं तर्हिति प्रहरति ॥ ॐ पृथिवि देवयजन्योष
ध्यास्ते मूलं मा हिᳪंसिषं ॥ व्रजं गच्छेति पुरीषमादत्ते ॥ ॐ व्रजं गच्छ
गोष्ठानं ॥ वर्षतु त इति वेदिं प्रेक्षते ॥ ॐ वर्षतु ते द्यौः ॥ बधानेत्युत्करे क
रोति ॥ ॐ बधान देव सवितः परमस्यां पृथिव्याᳪं शतेन पाशैर्यो
स्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ अपारुमिति द्वितीयं प्र
हरणादि । ॐ अपारुं पृथिव्यै देवयजनाद्वध्यासं ॥ व्रजं० । ग० । पु० । व
र्ष० । ब० । स० । व मौक् ॥ अत्रिन्यस्य स्पत्याग्नीदुत्करमररो दिवमिति ॥ ॐ अ
ररो दिवं मा पप्तो ॥ व्र० । द्रप्सस्त इति तृतीयं ॥ ॐ द्रप्सस्ते द्यां मा स्कन्

Takshashila Project

॥ अथ दर्शपौर्णमासेष्टिपद्धतिः ॥
कण्वशाखिप्रयोगः ॥ ॐ ॥ छ ॥

१५०
पुस्तकमर्थं
संतुचनवापदः
स्यनेन न ग्रं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥श्रीगणेशायनमः॥अन्वाधानस्यप्रथमपौर्णमास्यामन्वारंभणीया॥
नित्यानांसकृदारंभेकाम्यानांचपुनःपुनः॥सोमपसौत्रामणीवर्जम
न्वारंभःप्रयास्यते॥शास्त्राचम्यप्राणानायम्यदेशकालौस्मृत्वाम
मसपत्नीकस्याऽग्निसंस्कारार्थंश्रीपरमेश्वरप्रीतिपूर्वकमुपात्तदुरित
क्षयार्थंपौर्णमासेष्टिमहंकरिष्ये॥इतिसंकल्प्य॥सोपयहस्तस्यपा
णिंसपवित्रकदक्षिणहस्तऋत्विजोप्यपदिश्यपर्णेचतूसंस्कारपूर्वकं
गार्हपत्यादाहवनीयदक्षिणाग्नीन्धृत्वाऽध्वर्युर्यजमानोवाअन्वा
धानंकुर्यात्॥तथाहि विहारादुत्तरतःस्फ्योपयहःषट्समिधो
गृहीत्वा॥ॐत्रमतअग्निमष्टाकपालेनपुरोडाशेनअग्निषोमा

वंतराज्येनोपांशुअग्नीषोमावेकादशकपालेनपुरोडाशेनसद्योहं
यक्ष्ये॥तत्रपंचदशोवज्रः॥द्विहिरियाजः॥यवैर्वा॥अन्वाहार्यंदक्षि
णा॥येकेचनवैकल्पिकपदार्थाः॥स्तऋत्विकप्रत्ययेनावधारिताः
ॐममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषेम॥मह्यंनमंतां
प्रदिशश्चतस्रःत्वयाध्यक्षेणपृतनाजयेम॥इत्याहवनीयेसमि
धमादधाति॥तूष्णींद्वितीयांतिस्रःसमिधःसर्वत्रमध्ये॥एवमित
रयोरग्न्योः॥केशश्मश्रुवपनेवानियमः॥सद्यःपक्षेप्रतिपद्येवाऽग्न्य
न्वाधानोत्तरं॥षडासनी॥ब्रह्मयजमानयोर्द्वेप्रणीतापत्नीनां
चविहारादुत्तरतःएकैकमासाज्येवेदेनोपयहणं॥स्फ्येनात्पत्र

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

कुर्वीरन्नु॥ स्फ्योपयद्गः स्वयमुदं ङ्मुखः प्राङ्मुखं ब्रह्माणमुपवेश्य
दक्षिणाजानु स्पृष्ट्वा॥ ॐ अन्वाहार्यदक्षिणायां पौर्णमासेष्टौ भूपते।
भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे। वृतोऽजपत्ति॥ ॐ
अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देवस
वितरेतं त्वा वृणाते बृहस्पतिं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गा
यत्र्यै गायत्री त्रिष्टुभे त्रिष्टुप् जगत्यै जगत्यनुष्टुभेनुष्टुप्प्रजापतये २
प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणां॥ य
जमानः॥ वाचस्पते यज्ञं गोपायेत्याह॥ ॐ वाचस्पते यज्ञं गोपाय
ॐ। ॐ गोपायामि॥ अपरेणाहवनीयं दक्षिणातिक्रामति॥

ॐ अद्य देवाधिपमोदन [illegible] स्त्विषान्यस्य सदनो सीदयोऽस्मत्पाकत
रः॥ इति ब्रह्मसदनमीक्षते॥ ब्रह्मसदनात्तृणं निरस्य [illegible] प्र तिर
त्यक् दक्षिणा॥ ॐ निरस्तः पाप्मा सह तेन यं द्विष्मः॥ ॐ इदमहं बृह
स्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा तदग्नये प्रब्रवीमि त
द्वायवे तत्पृथिव्यै॥ इति ब्रह्मसदन आहवनीयमभिमुख उपवि
शति वाग्यत आनुयाजप्रस्य वाङ्गपरिहरणादि वा॥ व्याहृत्य
वैष्णवमंत्रं जपेदध्वर्युश्च॥ गार्हपत्यमुत्तरेणोदपात्रं निधायाल
ते। मंत्रप्रैषानुप्रैषादिषु प्रणवः सर्वत्र॥ ॐ भूतस्वाभूतकरिष्यामि
॥ ब्रह्मन्नपः प्रणेष्यामि यजमान वा [illegible] चं यच्छ॥ ब्रह्मा ॐ प्रणय यज्ञं

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

दिग्धालंजसा ॥ ७ ॥ यो वै यज्ञे कामा यः संपन्ने यो न्यूने यो तिरिक्ते य
द्वै यज्ञस्य संपन्नं तस्मार्ध्यं यन्न्यूनं तदन्नाद्यं यदतिरिक्तं तत्प्रजा स्यैतद्वै
व यजमानः सर्वान्कामानाप्नोति ॥ दत्तो मेऽक्षय्यो भाग्यः धर्मे बुद्धिर्विवर्द्धतां
॥ मनो मे रमतां सत्ये लक्ष्मप्रसादाद्धुतान्नानः ॥ श्रीयज्ञपुरुषाय नमः ॥
श्रीवः शरणम् ॥ श्रीरस्तु मंगलानि संतु ॥ श्री ॥

अपदर्शो श्रौ विशेषः ॥ प्रातरग्निहोत्रहोमांतेस्मायतनासुपलिप्य ॥ आ
चं० प्रा० दे० द्यो यापर्वदर्शेष्टिमहं करिष्ये ॥ उद्धरणादि षट् समिद्ग्रहणं ॥ ३
तस्मतस्रयमिमेष्टा कं० पुरो० विष्णुमंत राज्ये नो पांसुरे इत्यसीद्यावस्याकपा
लेन पुरोडाशेन० श्वोहं यक्ष्ये ॥ मांसमैथुनवर्जं मंकल्पः ॥ वपनं ॥ मध्या
ह्निकं वैश्वदेवं निर्लेजनं निर्वर्त्य ॥ अपराह्णे पिंडपितृयज्ञः ॥ तथाहि ॥
प्राचीनावीती निविविधा आग्नेयकोणमारभ्य प्रागादक्षिणेपन द
क्षिणाग्रैर्दर्भैर्दक्षिणाग्रैरेव परिस्तरणं दक्षिणाग्नेरुत्तरतः प्रागद
क्षिणसस्थं पात्रासादनमेके ग्राः कृष्णाजिनं ॥ उलूखलं ॥ मुसलं ॥ शू
र्पं ॥ चरुपात्रं ॥ उदकमान्यं ॥ मेक्षणं ॥ स्फ्यः ॥ उदपात्रं ॥ सकृदाच्छिन्नानि

तंडुलाः ॥ मूत्रा[illegible]णि ॥ अपरेण गार्हपत्यं चरुश्रपणं स्फ्यं च वा गृहीत्वो
त्तरेण दक्षिणाग्निमवहंति तिष्ठन् ॥ कृष्णाजिनादानं । उदगग्रं वास्त
रणं ॥ तत्रोलूखलं निधाय पितृतीर्थेन हविरोप्य मुसलं संयोज्य तिष्ठ
तो वहननं । वितुषीकरणं सकृत्फलीकरणं । पितृतीर्थेन चरुपात्रे तंडु
लानोप्य सकृत्क्षालनं आसादितोदकमासिच्य ॥ दक्षिणाग्नावेव श्र
पणं । अजिह्वायोद्वास्य मेक्षणेन जुहोति । अग्निमध्ये प्रथमाहुतिः । ॐ ४१
अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय न मम । तस्या
दक्षिणतो द्वितीया । सोमाय पितृमते स्वाहा ॥ इदं सो० ते न० प्रास्य तत्
। उत्तरयोः पुरस्ताद्दक्षिणाग्नेः मेक्षणप्रक्षेपः । दक्षिणेनोल्लिखत्यपहता

इत्यपरेण वा । स्फ्येन लेखाकरणं । ॐ अपहता असुरा रक्षांसि वेदिषदः
॥ उल्मुकं पुरस्तात्करोति ये रूपाणि इति ॥ ॐ ये रूपाणि प्रतिमुंचमाना अ
सुराः संतः स्वधया चरंति ॥ परापुरो निपुरो ये भरंत्यग्निष्टाँल्लोकात्प्रणुदात्य
स्मात् ॥ उदपात्रमावनेजयत्यपसव्यं । यजमानस्य पितृप्रभृति त्रीन् ॥
तत्र स्वयं करणपक्षे अमुकसगोत्रास्मत्पितरमुकशर्मन् वरुणस्व
रूप अवनेनिक्ष्व । अमु० गोत्रास्मत्पितामह अमुकशर्मन् प्रजापतिस्वरू
प अवनेनिक्ष्व । अमु० गोत्रास्मत्प्रपितामह० अमुकशर्मन्नग्निस्वरूप अ
वनेनिक्ष्वेति लेखामूलमध्याग्रेष्वनेजनं उपमूलं ॐ सकृदाच्छिन्नानि लेखा
यां कृत्वा यथावनिक्तं पिंडान्ददात्यसावेतत्त इति ॥ अमु० गोत्रास्मत्पितरमु०

तंडुलाः॥ मूत्राणि॥ अपरेण गार्हपत्यं चरुं पूर्णं स्रुचं वा गृहीत्वो
त्तरेण दक्षिणाग्निमवहंति तिष्ठन्॥ कृष्णाजिनादानं। उदगग्रीवास्त
रणं॥ तस्मिन्नुलूखलं निधाय पितृतीर्थेन हविरोप्य मुसलं संयोज्य तिष्ठ
तोवहननं॥ वितुषीकरणं सकृत्फलीकरणं। पितृतीर्थेन चरुपात्रे तंडु
लानोप्य मक्षालनाद्यश्रामादितोदकमासिच्य॥ दक्षिणाग्नावेव श्र
पणं। अजिह्वायोद्धास्य मेक्षणेन जुहोति। अग्निमध्ये प्रथमाहुतिः। ॐ ४१
अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय न मम। तस्या
दक्षिणतो द्वितीया। सोमाय पितृमते स्वाहा॥ इदं सो॰ ने न॰। प्रास्यतत
उनयोः पुरस्ताद्दक्षिणाग्ने स्रुप्रक्षेपः। दक्षिणेनोत्तरवत्पहृता

इत्यपरेण वा। स्फ्येन लेखाकरणं॥ ॐ अपहता असुरा रक्षांसि वेदिषदः
॥ उल्मुकं पुरस्तात्करोति ये रूपाणीति॥ ॐ ये रूपाणि प्रतिमुंचमाना अ
सुराः संतः स्वधया चरंति॥ परापुरो निपुरो ये भरंत्यग्निष्टांल्लोकात्प्रणुदात्य
स्मात्॥ उदपात्रमावनेजयत्यपसव्यं। यजमानस्य पितृप्रभृति त्रीन्॥
तत्र स्वयं करणपक्षे अमुकसगोत्रास्मत्पितरमुकशर्मन् वरुणस्व
रूप अवनेनिक्ष्वा अमु॰ त्रास्मत्पितामह अमुकशर्मन् प्रजापतिस्वरू
प अवनेनिक्ष्व। अमु॰ त्रास्मत्प्रपितामह॰ अमुकशर्मन्नग्निस्वरूप अ
वनेनिक्ष्वेति लेखामूलमध्याग्रेष्वनेन क्रमेण उपमूलं सव्यदक्षिणान्निलेखा
यां कृत्वा यथावनिक्तं पिंडा दद्यात्समावेतत्रेति॥ अमु॰ त्रास्मत्पितरमु॰

Takshashila Project

ल्वरु० प एतत्ते अ० स्वधा॥इ० पित्रे० कनामर्म एतेन मम।एवं पितामहाय।
प्रपितामहाय च न्येषमन्त्रे पिंडांश्चे विकीर्य अत्र पितरः इति जपति।ॐ अत्र
पितरो मादयध्वं यथाभागमावृषायध्वं। उदङ्स्त्व आतमनात्॥ आवृ
त्य अमीमदंत इति जपति॥ॐ अमीमदन्त पितरो यथाभागमावृषायिषत।
अवनेज्यपूर्ववत् निविं वि० स्य।नमो व इत्यंजलिं करोति षड्वा नमस्का
रान्।ॐ नमो वः पितरो रसाय।ॐ नमो० रः शो०।ॐ न० रो जीवाय।ॐ नः रः स्व
धा०।ॐ नमो० रो घोराय।ॐ न० रो मन्यवे नमो वः पितरो मन्यवे नमो वः पि ४२
तरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्म एतद्वः सूत्रा
णि प्रतिपिंडं।ॐ एतद्वः पितरो वासः।ऊर्जं मित्यपनो निषिंचति।ॐ ऊ

र्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्।स्वधास्थ तर्पयत मे पितॄ
न्॥ अवधाय सव्यं।पिंडाघ्राणं सकृदाच्छिन्नान्यग्नौ प्रक्षिपति।उल्मु
कं च॥इति पिंडपितृयज्ञपद्धतिः॥प्रातरग्निहोत्रं हुत्वा ब्रह्माणं वृणी
ते॥ आन्वाहा० दर्शपौ० यतद्स्याय छेनामिसंतामत्यं तं समानं॥
निर्वप।ॐ देव० अग्न० जु० प० द्वि० तूं० च०।ॐ दे० इन्द्राग्निभ्यां जु० एण्द्वि०
तूं० च० द्वादशकपालोपधाने उत्तरतस्थालारि।विलज्याल्लं चेदं दमय०
आ० इदमिन्द्राग्न्योः आ० आग्नेयस्ते चैं इन्द्राग्नी गः।पंचमेप० स्वा०
ग्निस्वा० सो० स्वाग्निस्वा० उपा० विष्णु० स्वाहेंद्राग्नी स्वा० दे आज्यपा
इत्यादि यज०।साग्रे इदमग्नये विष्णवे इन्द्राग्निभ्यां देवस आ० सद्इत्यादि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२ कृवि

समानं। वृधन्वंतावाज्यभागौ॥ अग्निः पलेनमन्मनाशुं नानस्तन्वं २
स्वां॥ अग्निर्विप्रेण वावृधौं ३। या ज्याप्रत्वं वत॥ ३ सोमगीर्भिष्ट्वा वयंवर्द्ध
यामो वचोविदः। सुमृळीको न आविश्वोंउ मूत्रधानयाजे। अग्नेय ऽ
वेवत॥ अध्वर्युः उपांशु॥ विष्णवे अ॰ बू॰ उच्चैः॥ उपां॰ इदं विष्णुर्वि च
क्रमे त्रेधा निदधे पदं॥ समूढमस्य पांसुरे। ३ उच्चैः धृ॰ प्र॰ आप्या॰
हि॰। आ॰ दक्षा॰ च॰ अ॰ अतिः विष्णुं उपांशु यजमान उच्चैः ये३ हे।
उ॰ विष्णुं। त्रिर्देवः पृथिवीमेष एतां विचक्रमे शतर्चसं महित्वा। प्रवि ४३
ष्णुरस्तु तवसस्तवीयांस्त्वेषं ह्यस्य स्थविरस्य नाम ३ वौ ३ उच्चैः
इदं विष्णवे न मम॥ अ॰ इन्द्राग्निभ्यामनुब्रूहि हि॰ इन्द्राग्नी अवसागत

२ है

मस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत ३ वौं ३ मू॰ अ॰ मपू॰ अतिः ह इन्द्राग्नी
ये यजामहे। इन्द्राग्नी॥ गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजं॥ १८
॥ इन्द्राग्नी वृत्रहणा सुवज्रा प्रनो नव्येभिस्तिरतं देष्णैर्वौ ३ षट्॥ इदमिन्द्रा
ग्निभ्यामिदं न मम॥ अ॰ स्विष्ट॰ अग्नये स्विष्ट॰ हि॥ ३ पिप्री॰ ह्यौं ३ स्वा॥ मा
॰ एक॰ विप्रकृता॰ जे अति क॰ अ॰ स्विज॥ ये यजामहे अग्निं स्विष्टकृतमया २
ळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाळग्नेः प्रिया
धामान्ययाट् विष्णोः उपांशु इन्द्राग्न्योः उ॰ प्रिया धामान्ययाड्देवानामा
ज्यपानां॰ आप्र॰ वास्यायां॥ प्रदे॰ नि॰ पाः प॰ अग्निरिदं ह॰ त विष्णुः उपां ४४
शु इदं हविः उच्चैः इन्द्राग्नी हविरजुषेता॰ तां॥

॥ इति दर्शे विशेषः शेषं पौर्णमासीवत॥ आ॥ ध॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥ इति पिंडपितृयज्ञसमाप्तः ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

देवतावर्ईयत्वेनाकस्यपृष्ठेयजमानोऽस्तु॥सप्तऋषयोग्नयःसुकृ
तां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्योंऽ प्रणयाय।अश्वला
न यस्तु॥अध्वर्युणाब्रह्मन्नपःप्रणेष्यामीत्युक्ते॥ॐ भूर्भुवःस्वर्बृ
हस्पतिप्रसूतःइत्युपांश्वनुक्त्वा ॐ प्रणयेत्युच्चैरतिसृजेत्॥ ॥अध्वर्यु
रनुज्ञातस्तन्तरेणाहवनीयःसंप्रतिनिदधातिकस्त्वेति।ॐ क
स्त्वायुनक्तिसत्वायुनक्तिकस्मै त्वायुनक्तितस्मैत्वायुनक्ति॥नां
तरेणगच्छेयुः॥काऽस्यव नस्पत्समार्त्तिकेरनिचारब्रह्मवर्चस ३
प्रतिष्ठाकामायथासंख्यं॥तृणोरग्नीनुपरिष्टायो॥पुरस्तात्प्रथमं
उदगग्रैःप्रागग्रैःश्चयथायोगं॥पुरस्ता दक्षिणतः।पश्चात्उ

त्तरतश्च॥एवमितरयोः॥अपणस्यपश्चादुत्तरतोवा द्विन्द्वाःपात्राणि
संऽसादयतियजमानोवा॥शूर्पाग्निहोत्रहवण्यौ॥स्फ्यकपालौ।शम्या नि:
कृष्णाजिनं॥उलूखलमुसले॥दृषदुपले।पात्री॥पवित्रच्छेदनानि॥ त्रणानि च
पवित्रे उपवेषश्च॥आज्यस्थाल्युपसर्जनीपात्रं च॥कुशामुष्टिरन्वा
हार्यपात्रं च।वेदितृण मध्विश्च॥योक्त्रं ऽस्रुवश्च॥जुहूरुपभृज्जा ध्रु
च वासन्नहनावच्छादनानि।परिधयो विधृती च॥आज्यं पुरो डाश
पात्री च॥होतृषदनं शृतावदानं च॥ॐ षधं प्राशित्रहरणे च॥अ
न्वार्यतंडुला॥अंतर्धानकटश्च॥पूर्णपात्रं पदे समिद्धा इध्माबर्हि
षो रूपकल्पनं॥षडवत्तं च॥अपणस्य पश्चात्स्फ्योपहितायां पात्र्यां

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

मोषधकरणं ॥ कर्मणे वामिति शूर्पाग्निहोत्रहवण्यादाय वाचंयच्छ
ति ॥ कर्मणे वां वेषाय वां आददे ॥ प्रतपनं प्रत्युष्टंनिष्टप्तमिति वा ॥ ॐ प्र
त्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ॥ उदकोस्पर्शः ॥ रौद्रꣳ राक्षसमासुरमा
भिचारिणिकं मंत्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृश्योदपः ॥ गच्छ
सु वैंतरिक्षमिति ॥ ॐ उर्वंतरिक्षमन्वेमि ॥ पात्र्यां वा स्फ्यो पहितायां
॥ तस्य द्वे धुरी षारोहणानि पात्रीबिंबं जपति ॥ एकश्रुति यज्ञकर्मणिः
जपन्यूꣳख याजमानवर्जं ॥ ॐ धूरसि धूर्व धूर्वंतं धूर्वतं योस्मान्धूर्व ४
ति तं धूर्व यं वयं धूर्वामः ॥ देवानामसि वह्नितमꣳ सस्नितमं पप्रित
मं जुष्टतमं देवहूतमं ॥ अह्रुतमसि हविर्धानं दृꣳहस्व माह्वार्मा ते य

ज्ञपतिर्ह्वार्षीत् ॥ विष्णुस्त्वाक्रमताम् ॥ प्रेक्षते उरुवातायेति हविष्पा
त्रं ॥ उरुवाताय त्वा अपहृतमिति निरस्यत्यन्यद्विद्यमाने निमृज्योत् ॥ ॐ
अपहतꣳ रक्षः ॥ उदकं यच्छंतामित्यालभते ॥ ॐ यच्छंतां पंच ॥ देवस्य त्वेति
गृह्णात्याग्नेयं चतुरो मुष्टीन् ॥ ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहु
भ्यां पूष्णो हस्ताभ्याम् ॥ अग्नये जुष्टं गृह्णामि ॥ एवं द्वि रपरं । तूष्णीं चतु
र्थं ॥ एवमग्नीषोमीयं ॐ देवस्य ॥ अग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ एवं
द्वि० तू० र्थं ॥ भूताय त्वेति शेषाभिमर्शनं ॥ ॐ भूताय त्वा नारातये प
रिशेषयामि ॥ स्वरिति प्राङीक्षते ॥ ॐ स्वरभिविख्येषं ॥ दृꣳहंतामिति दु
र्याणां ॥ ॐ दृꣳहंतां दुर्याः द्यावापृथिव्यां ॥ गच्छ उर्वंतरिक्षमिति ॥ ॐ उर्वंतरि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२ ततः प्रणीतां गच्छति

स्वा

ह्वमन्वेमि॥ अपरेणास्य पश्चात्सादयति॥ पिमास्त्वेति॥ ॐ दृषियोंना
नौ सादया। पुरस्तादुपस्थे अहमस्मि रक्षा॥ कुशौ समावप्रच्छिन्नाग्रौ याव
नंतर्गर्भौ कुशौ छिनत्ति पवित्रे स्थ इति॥ ॐ पवित्रे स्थो वैष्णव्यौ॥ त्री
न्वा॥ हविर्ग्रहण्यामपः कृत्वा तासामुत्पुनाति सवितुर्व इति॥ सवितु
र्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तास्थानेत
पः॥ समे कृत्वा दक्षिणेनोदिंगयति देवीराप इति॥ ॐ देवीरापो अ
ग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिं सुधातुं यज्ञप ५
तिं देवयुवम्॥ युष्मा इंद्रोऽवृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्रतू
र्ये प्रोक्षिता स्थेति तासां प्रोक्षणं॥ ॐ प्रोक्षिता स्थ॥ हविश्च॥ ब्रह्मन्ह

विः प्रोक्षिष्यामि॥ ब्र॰ ॐ प्रोक्ष यज्ञं॰ हि॥ ॐ प्रोक्ष॥ ॥ अथ स्वकायनीया
नानु॥ ॐ भूर्भुवः स्वर्बृहस्पतिप्रसूतः॥ उपांशु॥ ॐ प्रोक्ष ३ उच्चैः॥ ॥ अ
ग्नये त्वाग्नीषोमाभ्यां त्वेति यथादेवतमस्तु॥ अध्वर्युः॥ ॐ अग्न
ये त्वा जुष्टं प्रोक्षामि॥ ॐ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि। दैव्याये
ति पात्राणि॥ ॐ दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः प
राजघ्नुरिदं वस्तच्छुन्धामि॥ प्रथमं वज्रेणैव गृहीत्वा ॐ दैव्याय॰ मि
॥ कृष्णाजिनोलूखलमुसलशम्यादृषदुपलाशूर्पपात्र्युपवेषकपा
लानि मंत्रवदेकैकं प्रोक्ष्य आज्यस्थाल्यादीनां यथासादितपात्रा
णां तूष्णीं एकैकस्य प्रोक्षणं दैव्यायेति मंत्रेण॥ असंचरे प्रोक्षणी

स्रुपत्रे निधाय॥ शर्मासीति कृष्णाजिनादानं॥ ॐ शर्मासि॥ अपेत्य पात्रे
भ्यो वधूनोत्यवधूमिति॥ ॐ अवधूतꣳ रक्षोवधूता अरातयः॥ अद
०॥ प्रत्यग्रीवमास्तृणात्यदित्यास्त्वगसीति॥ ॐ अदित्यास्त्वगसि प्रति
त्वादितिर्वेत्तु॥ मध्या श्रून्ये निदध्यादुलूखलमद्रिरसि ग्रावासीति
वा प्रतित्वेत्युभयोः॥ ॐ अद्रिरसि वानस्पत्यः प्रति त्वादित्यास्त्वग्वे
त्तु॥ हविरावपत्यग्नेस्तनूरिति॥ ॐ अग्नेस्तनूरसि वाचो विसर्जनं ६
देववीतये त्वा गृह्णामि बृहद्ग्रावेति मुसलमादत्ते॥ ॐ बृहद्ग्रावासि
वानस्पत्यः स इदमित्यवदधाति॥ ॐ स इदं देवेभ्यो हविः शमीष्व सु
शमि शमीष्व॥ हविष्कृदेहीति त्रिराह्वयति॥ ॐ हविष्कृदेहि॥ ३॥ आ

हूय [illegible] स्याइत्यन्यो दृषदुपले कुक्कुटोसीति त्रिः शम्ययाद्रिर्दृषदꣳ स
हदुपलां॥ ॐ कुक्कुटोसि मधुजिह्व इषमूर्जमावद त्वया वयꣳ संघा
तꣳ संघातं जेष्म॥ १॥ ॐ कु० २॥ ॐ कु० ३॥ हविष्कृदं ते वाग्विसर्गः॥ अ
तः पत्नी वदत्यन्यो वा॥ वर्षवृद्धमसीति शूर्पमादत्ते॥ ॐ वर्षवृद्धम
सि प्रति त्वेति हविरुद्वपति॥ ॐ प्रति त्वा वर्षवृद्धं वेत्तु॥ परापूतमिति
निष्पुनाति॥ ॐ परापूतꣳ रक्षः परापूता अरातयः॥ अ० उपसमर्पेण
मध्ययवै॥ पुनः कण्डनं वितुषीकरणं तं अध्वर्युः अपहतमिति तुषां
निरस्य सुत्कारे॥ ॐ अपहतꣳ रक्षः अ० वायुर्व इति विनक्ति॥ ॐ वा
युर्वो विविनक्तु देवो व इति पात्राण्यप्यानिमंत्रयते॥ ॐ देवो वः स०

Takshashila Project

विताद्धिरण्यपाणिः प्रतिगृह्णात्त्वच्छिद्रेण पाणिना त्रिः फलीकरोति
फलीकृतस्य कणान्निदधाति प्रतिफलीकरणं कणनिधानं । पेषणोप
धानो युगपत्तच्च श्रीतं धृष्टिरसीत्युपवेषमादाय ॥ ॐ धृष्टिरसि ॥ अ
पाग्नइ त्वंगारान्नाचः करोति ॥ ॐ अपाग्ने अग्निमामादं जहि निष्क्रव्या
दं सेधा ॥ आदेवयजमित्यंगारमाहृत्य ॥ ॐ आदेवयजं वह ॥ कपा
लेनाववह्मादयति ॥ ध्रुवमसीति ॥ ॐ ध्रुवमसि पृथिवीं दृंह ब्रह्म वनि
त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय । मध्यमस्वं ७
गारं निदधाति अग्ने ब्रह्मेति ॥ ॐ अग्ने ब्रह्म गृह्णीष्व ॥ धरुणमसीति प
श्चात्त ॥ ॐ धरुणमस्यंतरिक्षं दृंह ब्रह्म॰ वं॰ ॐ अ॰ ष्व ॥ पुरस्ताद्धर्त्रे

मिति । ॐ धर्त्रमसि दिवं दृंह ब्रह्मवं॰ अ॰ ष्व ॥ विश्वाभ्यस्त्वेति दक्षिण
तः ॥ ॐ विश्वाभ्यस्त्वाशाभ्य उपदधामि ॥ अ॰ अ॰ ष्व ॥ समं चित उपदेद
क्षिणतएवमुत्तरतश्चितस्थेत्यूल्लौ वा ॥ ॐ चित स्थोर्ध्वचितः ॥ ॐ अ॰
चि॰ अग्ने ब्रह्म॰ चित्व॰ ॥ अ॰ ॥ चि॰ अ॰ ॥ एवमसौ सोमाय स्याधिकं
दक्षिणतः ॥ मध्यतोपि परतोपि पूर्वतो दक्षिणं तदनु पूर्वपश्चिमे ॥
पूर्वसंस्थमुत्तरयं निधीयतामुत्तरं वसुसंख्यया वितो ॥ मध्ये पश्चा
त्पूर्वतो दक्षिणे च दक्षासूर्वस्या नयोरंतराले ॥ दक्षात्पश्चात्तस्य प
श्चाद्दध्या पूर्वे पूर्वेत्राणि चैवोत्तराणि ॥ ॥ भृगूणामिति संगारे र
न्यूहति ॥ ॐ भृगूणामंगिरसां तपसा तप्यध्वं ॥ ॐ भृगू॰ तपसा जेनार

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.